विकारमलभमानोऽपि जायते विपरीतं रूपेणाविर्भवति तथा लोकदृष्ट्या जातो घटादिः कोपे परमार्थदृष्ट्या न जायते परिणामकार्येन साभावात् न सदादेरुत्पन्नघटादिरपि

अविनाशि तु तद्विद्धि येन सर्वमिदं ततं विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति १७

रूपत्वात् अस्य तत्त्वेन घटादिको नु जनयेत्कोऽपि कुतस्तर्हि सभामनन्तर इति चेत् तद्गुणादिरिव दृशिर्हेतु अनभेतन तत्तथामाणौवैस संनिबाधमेवास्य सं तस्याप्रसामसर्वमिदं विभाती
ति सतः सत्त्वेन तथा लोपलक्षितमप्रपंचस्य सत्त्वं सतोभानमेव तथा प्रपंचस्य भानमिति तथा च सप्रपंचगते सत्तास्फुर्तिरिति सत्त्वमयातामिस्यर्थः श्रुतिश्चात्र
न सौम्य शुंगेनापो मूलमन्विच्छ अद्भिः सोम्य शुंगेन तेजो मूलमन्विच्छ तेजसा सोम्य शुंगेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठा इ
ति तोऽयं गम्यतां नलं कार्यलिंगेन स्रष्टृरूपति सतोऽविनाशित्वं च विनाशहेत्वभावादित्याह विनाशमिति न कश्चित् अपमेतेन सर्वविकारशून्यस्य विनाश
कारणस्य अपरयो हि जन्मादिविकाराणां वा भवतीति सर्वत्र सर्वविकारोपलम्भन्याधायः न कश्चिदपि न तत्त्वस्य विनाशहेतोरभावादृशितः हि तौ या दै
भयं भवतीति श्रुतेः १७

एवं सतस्यात्मनो नित्यत्वं असतो देहादेरनित्यत्वं चोक्तमुपसंहरति एतेनेयुक्तं भिमुखं कौलोति अन्तवन्त इति पद्यापि ना सतो विद्यते भाव इति असतो देहानां कालत्रयेपि सत्वं नास्तीति परमार्थदृष्ट्या उक्तं तथापि लोकदृष्टिमप्रतिपद्यमानस्य नरकादिभयमनुरुध्यमानस्य व्यवहाराभिप्रायेण नित्यानित्यविभागमभिप्रेत्य देहानामन्तवत्त्वमुच्यत इति न दोषः नित्यत्वं कालापरिच्छेद्यत्वं तत्र व्यवहारेण भ्रमोप्यस्तीत्यत उक्तं अनाशिन इति नाशो अदर्शनं तद्यन्न हि आकाशः नभ आत्मा नित्यो पतनादिसात्वेनापि तु न तथैव सनाशी सर्वं हि एव प्रकाशमानत्वात् सर्वः एतद्दृशिपरिच्छेदवद्दृश्यत्वेन साहस्र अप्रमेयस्येति तथा च श्रुतिरात्मनः अप्रमेयत्वमाह एतदप्रमेयं ध्रुवमिति अप्रमेयमि

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत १८

सर्वः एतद्वात्मनि प्रमाणाप्रमाणतस्तेपि तथा च श्रुतिः येनेदं सर्वं विजानाति तं केन विजानीयात् विज्ञातारमरे केन विजानीयादिति प्रसिद्धिस्त्वप्रमेयस्यात्मत्वा दृश्यत्वाभावात् अपरोक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तर इति श्रुतेः उक्तं च प्रमाता प्रमाणाभासस्तैव च यत्प्रकाशात् सिध्यन्तीति तत्र संभावना कुत इति तस्माद्युध्यस्व भारत नमोक्षादि देहानां मिथ्यात्वं नित्यत्वाद्वा स्वयमेव न च प्रापनयाह स्वधर्मे निवृत्त्या लयाख्यधर्मेण न नाशनीय इति भावः १८ ॥ ॥ १८

ननु नासतो विद्यते भाव इति न्यायेनात्मनो मात्रादेर्मिथ्यात्वेन निःस्वरूपत्वात्कर्तृत्वेन संभवति अतः सत्यत्वकर्तृत्वं वधमोक्षभावत्वं च वाच्यं अस्य यथा ऽतः कालो वधश्चात्म
नश्च मोक्ष इति तत्पौर्वापर्यविकारापत्तेस्तत्त्वबोधेन सर्वमिदं हतमिति सतो देहाद्युपाधानत्वं योगेन तथा च हन्तेन क्रियायाः प्रयोजकस्य कर्तृत्वं कर्मत्वं चापततीति तद्विरुद्धत्वादात्मनि
आपायोगात् न तु हिंसन्ति विदुरिति तिरस्कारमिमामाशंक्याह य एनमिति यस्तु तार्किकादिः स्वात्मानं हन्तारं हननक्रियायाः कर्तारं मन्यते यश्चार्वाकादिः स्वं मे हतं देह
नाशेन क्रियायाः कर्मीभूतं मन्यते तावुभावपि न जानीतः आत्मतत्त्वमिति शेषः यस्मात् नायं हन्ति न हन्यते न हि यः कर्ता स आत्मा नापि देह आत्मा तयोः प्रागेवानात्मत्वावधा

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतं उभौ तौ न विजानीतो नायं हन्ति न हन्यते १९

रणात् तस्य भावः षड्भावाः पिंडे च दृष्टं तेषां अवस्थात्वात् अतः एवं मात्राद्युपरमे निर्विकारत्वं मात्रादिधर्मस्य नाशनः आत्मा नित्यकर्तृत्वमात्मनो निर्मात्रादिस्वे
योऽहं तत्त्वतो मात्रादिविशिष्टस्यैवेषां न केवलस्यात्मनो भस्म मात्रादिवियोगे भवतीति न वधमो क्षयोर्वैपर्यधिकरण्यं न च मात्रादेर्निःस्वरूपत्वमस्ति सत्त्वासत्त्वाभ्यामनिर्वचनी
यस्य ब्रह्मरूपेणापरस्य ग्रहणात् नैकवाच्यस्य स्वप्रमापार्थत्वं पूर्वं न गणयित्वा तत्तत्स्वरूपस्याभ्युपगमात् तस्मान्न कर्तृत्वमात्मधर्मः यथोक्तः आत्मा कर्ता हि रूपश्चेन्मा कांक्षील
हि मुक्तेनानहिंसको भावानां प्रवर्तते क्षपयेदेवानि किं च कर्तृत्वं गेहादिका रचनव संभवतीति नहो तस्य दुःखीति आत्मनो नाम यमानं हा क्षिलत्वं वा व्यते यथोक्तं

नैर्नैसर्पाद्दिक्रियांदुःखोमाभितकाक्षिकारिताः धीविक्रियासहस्राणांसाक्ष्यतोहमविक्रियरतितनचमनोदेहाद्युपारानेत्वेनहूननक्रियाकर्तृत्वंसंभवतितिविवर्तना
द्दाभ्युपगमात नत्वच्छत्नस्यधर्मैरधिष्ठानविकारोद्दृष्टेनयथोक्तं माध्यपत्रपत्रपद्दअतंनमनत्कृतेनगुणेनदोषेणवाःगुमात्रेणापिनसंवध्यनइतिविवृतंचैतद्वेदैः
नहिभूमिरूषरवतीमरुमरीच्युदकेनावाहिंनीमरितंममुहूहनिममगवारिकरवपिरिपूरवतीननर्हानयोषर्म्भुवंस्पशनीतिएतेनकर्तृत्वकर्मत्वयोरनात्मधर्मत्वादनात्मनस्था
नेकरुपलादेकत्वात्मानितदुभयविरोधोझावनमापिनिरस्तेवेदितव्यंएवंचार्वाकताकिकाभिमतोदेहात्मकर्तात्मवादोहंताचेन्मन्यतेहंतंहतश्चेन्मन्यतेहतंउभौतौ
नविजानीतोनायंहंतिनहन्यतइतिकाठकोक्तेनमंत्रेणापूर्वोर्द्धपाठभेदसहितेनपरिहृतोवेदितव्यः १९ २० ॥ ॥

४२ ५१

नायं हंति न हन्यते इत्युक्तं तत्र न हन्यते इत्येतदुपपादयति लक्ष्ये द्वितीयेन मंत्रेण न जायत इति अयं आत्मा कदाचिन्न जायते अभिनवो नोत्पद्यते न वा म्रियते विनश्यति न
नश्यति तार्किकाभिमते ध्वंसवत् न तत्रक्रमेणाहेतुद्वयं अजो नित्य इति अजत्वान्न जायते नित्यत्वाच्च न वा म्रियत इत्यर्थः अस्तु तर्हि क्षणिकविज्ञानवत्प्राणादृष्टः तन्मतविज्ञान
वादिभिः अजत्वनित्यत्वाभ्यां अपगमादित्याशंक्याह भूत्वा भविता वा न भूय इति अयं पदमनुवर्तते अयं भूत्वा भूयो भविता न भूयो ऽसत्कृत्वा भूत्वा भवितेति भवनक्रियाद्व
यस्यत्वाप्रत्ययोः समानकर्तृत्वधीरेव माभिप्रायेण भूत्वैव न तानन्नुभूत्वा स्थित्वा स्थित्वा स्थित्वा विनश्यतीति तार्किकाणां हि विज्ञानं उत्पत्ति स्थिति नाश क्षणत्रयापिस्यो

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः। अजो नित्यः शाश्वतोयं पुराणो न हन्यते हन्यमाने शरीरे २०

त्रिक्षणावस्थायिविज्ञानवादिनो हि पूर्वस्य नाशक्षणएव उत्तरस्योत्पत्तिक्षणः स एव तस्य स्थितिक्षणश्चेति क्षणिकत्वात् विज्ञानानां भवनक्रियाद्वयस्याव्यवधानाद्भूत्वा
भवितेति सुवचं तान् प्रति शोच्य एव पक्षः शाश्वतः शश्वदेकरूपः यो हं बाल्ये पितरावन्वभूवं सो हं स्थविरे प्रणप्तॄननुभवामीति वा स्मृत्या विरोधाच्चैकस्य प्रत्यभिज्ञानान्न तथा दृश्य
त्वस्वभिज्ञानस्यादृष्टत्वात् अतः स्थिरस्याभावान्म पक्षाज्जन्ममरणाद्यत्नो विधर्मर्मितो विशिष्टः पूर्वभूत्वा पुनर्धर्मान्तरविशिष्टो भविताऽयमपि न भूत्वैव भविता न त्वभूत्वेति यो
जनाकाह नाहि शरीरे यस्माणमात्मानमभ्युपगम्य तो नित्यस्यैकरूपस्यैवात्मनः कर्मणा व्युत्क्रमेणावमशक्यमन्तु जन्म तं गजशरीरजाउपाधि माणमेदहं मन्यमानाः भूतस्येवा
२१

भी. प.
५९

त्मनो विशेषणौ भूतपरिमाणा भवन्तो ऽपचयादिकं भवनमभ्युपगम्यन्ते तत्र पि त्वशाश्वतत्वादेरुपचयापचयवतो मध्यमपरिमाणस्य वस्तुनो नित्यत्वायोगात् अनेनैव
सुख दुःखादिधर्मवतो ऽस्य मनोभावं भूत्वा भवनं प्रसाक्षेपं न हि दुःखादिधर्मिणः स्वनाशमन्तरेण अस्य संभवति दुःखोच्छेदः संभवति यतो ऽपायवत्स्वनाशश्चेन्नात
नन्वजत्वं नित्यत्वं शाश्वतत्वं चाकाशस्याप्यस्ति अतस्तस्य आद्यगुणा इति पुराणविपर्यासोदितः प्रागपि सञ्च स एव ए नैन अपक्षयादिधर्मता हि सामान्यमजत्वादिकं आत्मानाए वविप
हरेत्वमुक्तं नरिति हार्थेतं अनवशरीरे हन्यमाने न हन्यते भाष्ये तया शरीरस्यार्थं न जायते म्रियते वेत्यर्थः तत्रोपपत्तिः अयं न भूत्वा अभूत्वा च न सभवनं भविता घटादि
वदेतो न जायते अथवा नञः पूर्वान्वयित्वे न जायते न वा म्रियते इत्यर्थः तो भूत्वा अभविता घटवद्विनाशि न अतो न म्रियते इति शाश्वतः पुराणः इत्यनयोः अपचयापच
यो न विधेयेते इति न हन्यते न विपरिणम्यते इति व्याख्याने केचिदेवमाहुः न जायते म्रियते इति प्रतिज्ञा कदाचित् हि नात स्यादुपपादने अजः इत्यादि हेतुसंग्रह इति २०

राम.
५८

नायं हन्तीत्येतदुपपादयन्नविद्येति विनष्टस्य पूर्णेनांशेन शीलमस्येति विनाशि क्षणिकं तस्मान्पृथिव्यप्तेजःस्थूलसूक्ष्मकारणशरीराभ्यां ततोस्य अविनाशिनं अत एव नित्यं नाशहीनं
तत्र हेतुः अजं जन्मवान् न हि अनित्यः अतएवाव्ययं अजत्वान्नित्य इत्यर्थः ननु विनाशिनः स्वकार्यापेक्षयाप्यवयवत्वं नित्यत्वं च सांख्याभिमते प्रधाने तार्किकाभिमते नभसि वा दृष्टमित्य
तदुक्तं अव्ययमिति नेत्यन्ति पूर्वावस्थां सजतीत्यव्ययं परिणामि प्रधानं तद्वलक्षणं गुणहन्तमिति निरवयवेन गुणसाम्यावस्थायामपि परिणाममात्रमेवमर्थं हन्तीति तेषामप्युपगमात
आकाशस्यापि तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्युत्पत्तिश्रवणात् नत्वाभावादेवं नाप्यवत्वं तादृशमात्मानं यो वेद स पुरुषो कं हन्ति कथं केन प्रकारेण कमस्य
का१

वेदाविनाशिनं नित्यं य एनमजमव्ययं कथं स पुरुषः पार्थ कं घातयति हन्ति कं २१

घातयति हननक्रियायां प्रवर्तयति कं वा हन्ति न केनचित्प्रकारेण कमपि घातयति न वा हन्तीत्यर्थः हेत्वभावात् तत्र तथा हि श्रुतिर्विधायकस्य यां सर्वकारकव्यापारं निषेधति
पत्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् इत्यादिः अविद्यावस्थायामेव च सर्वकारकव्यवहारं दर्शयति यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्यादिना तेन सर्वकारकोपमर्दि
तविद्यायाः सर्वकारकसाध्यैः कर्मभिः सह समुच्चयो नितान्तः परस्परविरुद्धस्वभावत्वेन शीतोष्णयोरिवैकस्य कार्यकालत्वस्यासंभवात् अयेनात्मविद्भिः भवादि संन्यस्तविध्यवृत्तिः मा
दृशानां मुमुक्षूणां कालेन विद्योदयेन ज्ञानं साधयितव्यमिति हेतुः अमस्तावपि विषयान् स्वाधिकारत्वादग्राम्यकर्माणामप्येतदारम्भेण न दोषः तथा च वक्ष्यति हत्वापि स इमांल्लोकान्न ह
न्ति न निबध्यत इति २१

गी०२ नस्तुतात्प्रणोपजेनतज्ञानप्रवः कस्मैकेशोयंत्रीनार्थोनेतिवृग्नात्मानंवयोगणादिविशेषणात्वेनमेवाधिकस्यकर्मविषयः प्रवर्तेनेननीत्वाद्स्नमिवदेहादमस्यात्मावधार
६० पितेनरात्मन्तरद्व्याशंक्याहवासांसीतिद्वेषांनिन्वाहेनिदंतुरूपविशेषणात्वेपिनंप्रेषानुवत्स्वरूपांतर्गतत्वंएवंब्राह्मणत्वादेरपिनत्वर्गकामत्वरूपांतर्गतत्वमिति
वस्त्रेवस्त्रनयोऽपिनतुतुसुर्येर्ईहात्मनोऽसंतविलक्षणात्वमहत्वानिवस्त्रनाशेनदेहस्यनाशंमन्वानस्येवतदेहनाशात्मनाशमन्वानस्यासंतमोहुकंस्यवमिति

वासांसिजीर्णानियथाविहायनवानिगृह्णातिनरोऽपराणि तथाशरीराणिविहायजीर्णान्यन्यानिसंयातिनवानिदेही २३ नैनंछिंदंतिशस्त्राणिनैनंदहतिपावकः नचैनंक्लेदयंत्यापोनशोषयतिमारुतः २४

भावः एतदर्थश्लोकः कीदृशोऽसौ देही यतस्त्वाहनैनमिति एनंशस्त्राणिनछिंदंतिनद्वेधाकुर्वंतिअस्थूलत्वात् तर्हियथाग्निर्वपर्माणुवसाकज्जलपावकोऽयोमपिविध्यतीत्याशं
क्याहनैनंदहतिपावकइतिअवर्णत्वात् तस्यापश्चैनंनक्लेदयंतिअस्पर्शत्वात् तथाविदर्द्रामद्रिार्द्रीकर्तत्वंनत्वस्पर्शेनशोषयतिमारुतः अस्नेहत्वात् एतेनअस्थूलमनणु
अह्रस्वमस्पर्शमरूपमव्ययंतथारसंनित्यमगंधवच्चयदितिश्रुतिप्रसिद्धानामदीर्घत्वाशब्दत्वादीनामपिसंग्रहोज्ञेयः २३ ॥ ॥ राम ॥

राम०
६०

कुतो हेतोरस्य शस्त्रादि[illegible]छेद्यादीन्यनुवर्तंते इत्याशंकातस्य छेद्याद्ययोग्यत्वादित्याह अच्छेद्योयमिति अत्राच्छेद्यत्वोपपादिका मेव अस्थूलत्वादीनि कारणानि ज्ञेयानि एवमछे
द्यत्वादिना स्थूलादीन् भावरूपान्गुणाननुक्त्वाभावरूपानपि गुणानाह नित्यइति सर्वैर्विशेषणैरात्मैकरूपमेव वस्तु नो नश्वरत्वात नित्यत्वादिभिः हस्यायतत्वादिकं निराक्रियते
यतो नित्यस्त्वतो परवस्त्वनुसाधः यतः सर्वगतः अतो ग्रामवत्प्राप्यः यतः स्थाणुः पूर्वरूपापरित्यागेन स्थिरस्वभावः अतः क्षीणदिवद्विकार्यः अचलः यथा पर्वताः स्थिरतः
साध्यासाध्यत्वेऽपि अमलत्वेनैवातो न साध्यात्मत्वमाश्यते एवं तत्स्थाणुरपि अस्य संयोगाद्यं च अमस्त्रीयते महोत्कर्षपालभ्रमत्संस्कारमेघ्यते अयं अचलत्वान्न

अच्छेद्योयमदाह्योयमक्लेद्योशोष्य एव च नित्यः सर्वगतः स्थाणुरचलोयं सनातनः २४

तथा एवं च उस्य साधिविकृतिसंस्कृतिरूपं चतुर्विधं क्रियाफलमात्मनि न संभवतीत्युक्तं तत्र हेतुः सनातन इति सनातनः सर्वदा एकरूपः नैरंतर्येण तत्र देशतः कालतो वस्तुतश्च य
परिच्छेदरहितस्वरूपत्वेन प्रमाणज्ञो कालतः परिच्छेदाभावेऽपि देशपरिच्छेदोऽस्ति आकाशस्य तदुभयाभावेऽपि वस्तुतः परिच्छेदोऽस्ति सोऽपि त्रिविधः सजातीयविजातीयस्वगतभेदरू
पः यथा वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादितः वृक्षान्तरात्सजातीयो विजातीयः शिलादितः ततश्च सनातनो नैरंतर्यात्त्रिविधपरिच्छेदरहितो भवति अत्र नित्यसनातनयोः
खेदैकाभोयस्मात्तस्मात्तेनोस्य[illegible]अपारसर्वः २५

एवं नैयं बलस्ते तत्त्वज्ञस्यात्तरे देहद्वयनिरोधेन स्वरूपेणोपशोककर्तव्यमित्याह अव्यक्तोयमिति अव्यक्तं स्थूलशरीरं प्रत्यक्षगम्यं तद्भ्योयं प्रत्यगात्मा न तथा अचिन्त्योयं चिन्तायोग्यं
रूपादिमत्कारणकार्ययानुमेयं यच्च सूक्ष्मशरीरं सुखदुःखात्मकं लिंगशरीरं स्वप्रत्यक्षं तत्ततोन्योयं न तथा अविकार्योयं विकारं स्थूलसूक्ष्मकार्यभावेनावस्थानमर्हतीति विकार्यं
त्रिगुणात्मकं मूलाज्ञानं कारणशरीरं तस्मात्स्थितं न किंचिद्वेदिषमिति प्राज्ञमर्शादर्शनादहं न ज्ञानामीत्यनुभवाच्च साक्षिकगम्यं ततोन्योयं उच्यते सत्कारादिनिषेधमुखे
२४ न न तु स्थूलग्राह्यादिरूपाःमेवं विधयत्निविविधिमुखेनोच्यते यस्मादेवमयमुच्यते तस्मादेनं विदित्वा नानुशोचितुमर्हसि त्वं इति शोकमात्मविदिति श्रुतेरात्मविद्त्वादेव ध्रुवियोग
जं शोकं मा कार्षीरित्यर्थः उक्तं चात्मनोऽवस्थात्रयातीतत्वं स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिता इति २५ एवं तत्त्वदृष्ट्या शोको

मू॰

अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि २५ अथ चैनं नित्यजा
तं नित्यं वा मन्यसे मृतं तथापि त्वं महाबाहो नैवं शोचितुमर्हसि २६ जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृत
स्य च तस्मादपरिहार्येर्थे न त्वं शोचितुमर्हसि २७

नोचित इत्यसंगतं तत्राह स्वकृतत्वान्न तदेहस्यापि शोको नोचितस्तत्राह अथ चेति नित्यसंनियमेन जातं नित्यजातमिति चार्वाकपक्षः नित्यं सर्वदा जातमिति क्षणिकविज्ञानवा
दिपक्षः नित्यं मृतं सोऽत्र पूर्वदेहे इदियं सर्वथा ज्ञातमृतिना किंका इति पक्षः एवं नित्यं वा मन्यसे मृतं तथापि त्वयि योज्यं पक्षत्रयेपि शोको न युक्तः महाबाहो इति पुरुषार्थमुत्साहयति २६
शोचितुं नार्हसीत्युक्तं तत्र हेतुमाह जातस्येति ध्रुवोऽपरिहार्यः मरणमीशाः अपरिहार्येर्थमाणां त्वं लदृष्टयोगं विनापि अवश्यंभाविनि विषये न त्वं शोचितुमर्हसि त्वं स्पीति च मयैवैव
ते निहताः पूर्वमेवेति २७

अस्त्वात्मनो शोच्यत्वं तथापि स्थूलदेहविनाशजः शोको भवत्येवेत्याशंक्य सकारणस्य देहादेर्मिथ्यात्वं दर्शयति अव्यक्तादीनीति भूतानि वियदादीनि तद्विकारभूतानि जरायुजादीनि च न व्यक्तमव्य
क्तं अज्ञानं तदेव आदिर्येषां तान्यव्यक्तादीनि व्यक्तः स्पष्टः मध्य उत्पत्तिमारभ्य मरणात्प्रागवस्थाऽ एषां अव्यक्ते एव निधनं लयो येषामिति अयमर्थः रज्ज्वुरगादिकारणमज्ञानं रज्जुवत् उरगवद्भाव्यक्तमस्ति परीक्षमाणां वनष्ट
प्रियथमवतरणं अतस्तद्व्यक्तं ततउत्पन्नः सर्पः तत्रैव लीयते नश्चांयदेवं आत्मनि कल्पितानां भूतानां आदिरंतश्चाव्यक्तमेवं तेन आद्यंतवर्जितं यत्रास्ति वर्तमानेपि तत्तथैव तन्याये न मध्ये भासमानान्यपि तानि
रज्जुरगवत् असत्येवस्वं विधे तत्र तस्मिन्विषये का परिदेवना को वा विलापः नहि महमरीचिकाद्ये नष्ट इति कश्चित्त्ववित्तु विलपति अतएव भूतानां रज्जुरगादीनामिव प्रतीतिसमकालिकीं सृष्टिमपि

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत अव्यक्तनिधनान्येव तत्र का परिदेवना २८॥

प्रेत्य कौषीतकिब्राह्मणे स्वापप्रबोधयोर्जगल्लयोदयावुपन्यस्तौ स यदा स्वपिति तदैनं वाक् सर्वैर्नामभिः सहाप्येति चक्षुः सर्वै रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति स यदा
प्रबुध्यते ऽथैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो लोका इति प्राणाः चक्षुरादीन्द्रियाणि देवास्तदनुग्राहकाः सूर्यादयः लोकाः रूपादयः न चिहान्यत्रच आत्मैव सर्वभूतानां लयोदय स्था
नमित्युच्यते नान्यत्तत्कथमेषामव्यक्ते लयोदयस्थानमित्युच्यते सत्यं अज्ञानाश्रयत्वाद्ब्रह्मणि तथाव्यपदेशो न वस्तुगत्या नहि अपरिणामिनः ब्रह्मस्थस्य मृत्तत्कथमेषामव्यक्ते लयोदयस्थानत्वं
॥ संभवति यथोक्तं अस्यैव हि तद्रज्जौ सर्पवदुपादानकारणं अज्ञानं तदुपाश्रित्य ब्रह्मकारणमुच्यत इति २८॥

क्री न २

भी० ६२ ननुवज्रपंजरतुल्यस्य सर्वप्रमाणासिद्धस्य विपरीतद्विप्रपंचस्य कथं रज्जुरगादिवदज्ञानप्रभवत्वेनात्यंततुच्छत्वमुच्यते कथं वा मिथ्याकांडाये क्षितमात्मनो यज्ञादिकर्तृत्वं वा पद्भ्यत इत्याशंक्याह आश्चर्य
वदिति कश्चित्तज्ज्ञातात्मतत्वः एनं अतीतानंतरश्लोकोक्तं भूततमात्मानं आश्चर्यवत् आश्चर्यं अद्भुतं स्वप्नमायेंद्रजालादिकं तेन तुल्यं आश्चर्यवत् तथाभूतं पश्यति तथा कश्चिदेनं आश्चर्यवद्वदति सत्वे व
न असत्वेन वा निर्वक्तुमशक्यमपि अनिर्वचनीयमेव लोकाप्रसिद्धेन रूपेणोपपादयति तथा हि रज्जुरगवत्प्रपंचः सत्वे बाधकाले हानानास्ति किंचनेतिश्रुत्या न बाध्येत असत्वे च न प्रतीयेत तस्मादनिर्व
चनीयोयमिति तदिदं सर्वव्यवहारास्पदस्यापि प्रपंचस्य मिथ्यात्वोपपादनमेतदाश्चर्यमित्यर्थः तथा यन्नं प्रपंचं अन्य आश्चर्यवत् शृणोति इमे लोका इमे देवा इमे वेदा इदं सर्वं यदयमात्मेति प्रत्य
क्षे आनात्मतया उपलभ्यमानस्यापि प्रपंचस्य प्रत्यगभिन्नत्वेन श्रवणं तदेतदाश्चर्यं न ह्ययं श्रुतिः यजमानः प्रस्तर इत्यादिवदुपचरितार्थो प्रपंचस्यात्मनः एष्टत्वे आत्मा नो वा श्रो

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् २९॥

६३ र्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितं भवतीत्येकविज्ञानात्सर्वविज्ञानप्रतिज्ञोपरोधापत्तेः नच प्रतिज्ञाप्यौपचारिकी प्रदेशांतरे श्रुतस्य यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्यादित्यादिदृष्टांतस्यो ति १
परोधापत्तेः नच प्रतिज्ञाप्येतस्याः प्रतिज्ञादृष्टांतनिगमनानामेकवाक्यत्वात् न प्रपंचस्यात्मान्यत्वं तच्चमेदं न हि प्रत्यक्षविरोधादाश्चर्यमिदं शृणोति तथा कश्चिदेनं प्रपंचं प्रत्यगतन्यत्वेन श्रुत्वा अपि शब्दात्तु
क्वास्वप्नादिदृष्टांतैरुपपाद्य ध्यानेन च साक्षात्कृत्वापि तत्वतो न वेद न जानाति तथा हि प्रामाण्यप्रज्ञानात्रैविक्षेपवत्तः परिहीयत इति वक्ष्यति तस्मा ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ राम० ६२

हात्मैकात्म्यं भवत्येव प्रपंचस्यास्य रज्जूरगादितुल्यत्वेन तुच्छत्वं यद्बोधेन आत्मानेकत्वभोक्तृत्वदुःखित्वानित्यत्वजडत्वसंगित्वपरिच्छिन्नत्वादिधर्मवत्तया प्रसिद्धमपि तत्त्वमसीत्यागमोत्थया ब्रह्माकारां
तःकरणवृत्त्या ब्रह्मविद्याख्यया अकर्तारमभोक्तारमानंदघनं सत्यचिद्रूपमसंगमनंतमपरोक्षीकरोतीति महदाश्चर्यं यथापतितस्याश्चर्यवदिति क्रियाविशेषणं वा अविद्यकमपि दर्शनमविद्यास्वात्मान्तं
चकर्तृकरणो वह्निवन्निवर्तयतीति यद्वायः पश्यति स आश्चर्यवदिति कर्तृविशेषणं यतस्तत्कारणविहानस्माधिपुल्यान्वोपरसर्वविरहमात्मनो ब्रह्मभावं जीवभावं च यावदारब्धकर्मरूपमनुभवतीति तत्त
या वा श्चन मातीतमप्यात्मानं यद्द्रष्टा वदति तत्स्याश्चर्यं अगृहीतसंगतिकेनापि शब्देन यथा सुप्तः प्रबोध्यते तत्त्वयथोक्तं वार्त्तिके अगृहीतैव संबंधमभिधानाभिधेययोः हित्वा निद्रां प्रबुध्यंते सुषुप्तौ बोधिता
परैः जाग्रद्भ्यो नयतः शब्दं सुषुप्तेवेति क्वचन धत्ते स्तोज्ञानतो ज्ञाने ब्रह्मास्मीति भवेत्फले अविद्याध्वंतिनः शाहाघा हं ब्रह्मेति धीमवेतनस्य त्वविद्यया सांह्रहत्वारोगमिवौषधमिति तथाय: शृणोति बोधितेश्चा
श्चर्यवत् अतिदुर्लभमस्त्यर्थः श्रवणायापि बहुभिर्यो न लभ्य इति श्रुतेः शृण्वन्तोपि बहवो यन्न विद्युरिति श्रुति द्वितीययाद्यार्थसंग्रहः तिश्रुत्वाप्येनमिति आश्चर्यो वक्ता कुशलोस्य लब्धा श्चर्यो ज्ञाता
कुशलेनानुशिष्ट इति उत्तरार्द्धं श्लोकपूर्वार्द्धेन संगृहीतमिति ज्ञेयं दुर्विज्ञेयोयमात्मा तेन तज्ज्ञानार्थं यत्नः कर्तव्य इति भावः २९ ॥ ॥ ॥

गी० ६३

प्रकृतमर्थमुपसंहरति देहीतिसर्वाणिभूतानिकथमेतेदीनाअल्पबलाःबलवन्तरेणामयाहंतव्याःकथमेषपुत्राद्‍यस्त्वेतैर्विनाजीविष्यंतिकथंवाऽहंभीष्मादिगुरुभिर्विनाजीविष्यामीतिशोचि
तुंनार्हसीत्यर्थः ३० अर्जुनस्यअनात्मनिदेहेआत्मधीरूपोमोहोनिवारितःइदानींस्वधर्मेयुद्धेअधर्मधीरूपंमोहंनिवारयतिस्वधर्ममपीत्यादिनायुद्धंक्षत्रियस्यस्वोधर्मःतमवेक्ष्यापिविकंपितुं
चलितुंनार्हसियस्मात्धर्मादनपेताद्युद्धादन्यत्क्षत्रियस्यश्रेयःप्रशस्ततरंनास्ति ३१ किंचयदृच्छयाअप्रार्थितमप्युपपन्नंउपस्थितंस्वर्गद्वारंअयात्वामुद्दिश्यतेयेक्षत्रियाःलभंतेतेसुखिनोधन्या

देहीनित्यमवध्योयंदेहेसर्वस्यभारत तस्मात्सर्वाणिभूतानिनत्वंशोचितुमर्हसि ३० स्वधर्ममपिचावेक्ष्यनविकंपितुमर्हसि धर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्यनविद्यते ३१ यदृच्छ
याचोपपन्नंस्वर्गद्वारमपावृतं सुखिनःक्षत्रियाःपार्थलभंतेयुद्धमीदृशं ३२ अथचेत्त्वमिमंधर्म्यंसंग्रामंनकरिष्यसि ततःस्वधर्मंकीर्तिंचहित्वापापमवाप्स्यसि ३३ अकीर्तिंचापि
भूतानिकथयिष्यंतितेव्ययां संभावितस्यचाकीर्तिर्मरणादतिरिच्यते ३४ भयाद्रणादुपरतंमंस्यंतेत्वांमहारथाः येषांचत्वंबहुमतोभूत्वायास्यसिलाघवं ३५ ॥ ॥

भावंतीतिसंबंधः ३२ युद्धत्यागेइष्टनाशोनिष्टप्राप्तिश्चभवतीत्याह अथचेदिति ३३ अव्ययांदीर्घकालां ३४ अकीर्तिमेवाह भयादितित्वंबहुमतोभूत्वास्वतएवअतिश्लाघ्यत्वंसन्
लाघवंलघुभावंकातरत्वं येषांपुरतोयास्यसितेमहारथास्त्वांमयाद्रणादुपरतंमंस्यंतइतियोजना ३५ ॥ ३५ ॥ ॥ ३५ ॥ ३५ ॥

राम० ६३

किंच अवाच्यवादान् वक्तुमयोग्यान् शब्दान् षंढ इति लोर्जुन इत्यादीन् सामर्थ्यं निंदंतः धिगस्य शौर्यं यो भीष्मादिभयात्पलायित इति इदं वचनं मरणादपि अधिकं दुःखं न इतोन्यत् दुःखतरमधिकं दुः
खं किं न किमपीत्यर्थः ३६ यद्वा जयेम यदि वा नो जयेयुरित्युक्तं तत्राह हतो वेति द्वयोरपि स्थिरस्य स्वर्गो वा राज्यं वेति लाभद्वयमस्तीति पक्षद्वयमपि हितावहमित्यर्थः ३७ स्वधर्ममप्युद्धस्याकरणे धर्मकीर्त्योर्ना
शः पापावाप्तिश्चाथचेदिति श्लोकेन भवता यदुक्तं तथापि युद्धस्य अर्जुनेनाभिमतत्वात्पक्षे अहो बत महत्पापं कर्तुं व्यवसिता वयं यद्राज्यसुखलोभेन हंतुं स्वजनमुद्यता इति तत्र करणी
पायप्रसक्तिरस्तीति तां निवारयितुं सिध्यसिध्योः समत्वलक्षणात् योगः सुखदुःखे इति समे कृत्वा सुखयोस्तद्धेत्वोः राज्यलाभालाभयोः तद्धेत्वोः जयपराजययोः रागद्वेषावकृत्वेत्यर्थः केवलं स्वधर्मो

अवाच्यवादांश्च बहून्वदिष्यंति तवाहिताः निंदंतस्तव सामर्थ्यं ततो दुःखतरं नु किं ३६ हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीं तस्मादुत्तिष्ठ कौंते
य युद्धाय कृतनिश्चयः ३७ सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ३८ ॥ ३८

यमिति [illegible] मत्वा युद्धाय युज्यस्व एवं कुर्वंस्त्वं पापं नावाप्स्यसि यस्तु राज्यलोभेन स्वजनवधं करोति तस्यैव पापमिति भावः कथं तर्हि स्वधर्मत्वेनानुष्ठितेपि युद्धे हतो
वा प्राप्स्यसि स्वर्गमित्यादिफलार्थनिमित्तच्छायागंध इत्यनुत्पद्यते एवं धर्मं चर्यमाणा मध्ये अनूत्पद्यते न धर्महानिर्भवतीति आम्नानिदर्शनेन प्रतिपादयति ३८ ॥ ३८

अस्मरणमानुषंगिकमिति क्रमः तथा वाप तत्वः तथपाम्रे प्र

भी. ६४

एवमर्जुनस्यपूर्वोक्तौहावपिमोहावपनीतौतत्रकंघातयतिहंतिकमितिकर्तृत्वकारयितृत्वयोरात्मन्यसंभवउक्तःनतेयुद्धायप्रयुज्यस्वेतिनियोगाभ्युक्तःनत्वकर्तुराकाशवत्सर्वगतस्यनियोज्यत्वंसं
भवतीतिपरस्परस्याहतमेतदितीमामाशंकांअधिकारभेदेनउभयंव्यवस्थापयन्परिहरतिएषातेतिएषातेतुभ्यंअभिहिताअशोच्यानन्वशोचस्त्वमित्यादिनास्वधर्ममपिचावे
क्षेत्यतःप्राक्तनेनसंदर्भेणतज्ज्ञात्वासांख्येसम्यक्ख्यायतेप्रकथ्यतेवस्तुतत्त्वमनयेतिसंख्याउपनिषत्तत्रविदितिसांख्यऔपनिषदेब्रह्मणिविषयेबुद्धिर्ज्ञानंसंसारनिवर्त्तकंएषाते
सांख्येबुद्धिरभिहितेतिसंबंधःयोगेसिध्यसिध्योःसमोभूत्वासमत्वंयोगउच्यतइत्यग्रेवक्ष्यमाणलक्षणोविषयेतुशब्दःपूर्ववैलक्षण्यद्योतनार्थःबलादिचज्ञानकर्मनिष्ठयोर्विभिन्नाधि
कारित्वंलोकेस्मिन्द्विविधानिष्ठापुराप्रोक्तामयानघज्ञानयोगेनसांख्यानांकर्मयोगेनयोगिनामितिएतेनकर्मणांसमुच्चयशंकाप्यपास्ताइमांस्वधर्ममपिचावेक्षेत्यादिनाभ
हीः।

एषातेभिहितासांख्येबुद्धिर्योगेत्विमांशृणु बुध्यायुक्तोययापार्थकर्मबंधंप्रहास्यसि ३९

तरगनंथेनोक्तामपिविस्तरेणाभिधीयमानांशृणुइमामेवबुद्धिंस्तौतिसार्धेनबुध्येत्यादिनानतुकर्मबंधप्रहाणमात्मज्ञानेनैवश्रूयतेतमेवात्मायदृंविदित्वानलिप्यतेकर्मणापापकेने
तिश्रुतेःकर्मयोगस्तुकर्मबंधंदृढीकरिष्यत्येवेतिकथमुच्यतेकर्मबंधंप्रहास्यसीतितत्रैतच्छ्रुतिवलादितिब्रूमःतथाहिईशावास्यमिदंसर्वंयत्किंचजगत्यांजगत्तेनत्यक्तेनभुंजीथा
मागृधःकस्यस्विद्धनंकुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाःएवंत्वयिनान्यथेतोस्तिनकर्मलिप्यतेनरेइतिश्रुतिःईश्वरेणोहंसर्वंवस्तुभितमस्तीतिनकश्चित्किंचित्स्वेच्छयाकर्तुंप्रभव
तिअतःसर्वत्रममताहीनःसन्भोक्तृत्वकर्तृत्वाभिमानत्यागेनैवभोगान्भुंक्ष्वकर्माणिचकुरुएवंकुर्वतित्वयिकर्मलेपोनास्तिइतोन्यदुपायांतरंचनास्तीतिवदन्तितस्मात्कतककाद्य
यसाद्विवत्केनचिद्दिशेषरूपेणोयंतंकर्मैवसजातीयोच्छेदनिमित्तंभविष्यतीतियुक्तमुक्तंकर्मयोगेनापिकर्मबंधंप्रहास्यसीति ३९ ॥ ॥ ३९ ॥ राम. ६४

एतदेवोपपादयति नेहेति इह कर्मयोगे धर्मत्वेनानुष्ठीयमाने अभिक्रमस्योपक्रमस्य कर्मारंभस्य नाशो नास्ति अन्यथा फलाभावप्रसंगात् नापि प्रत्यवायोऽस्ति इह विहितकर्मणि ... उपक्रमात्तस्य नाशो नास्ति अव्यक्तफलत्वात् नापि प्रत्यवायोऽस्ति विहितत्वात् ... एवेत्यर्थः
पिकाम्यांतःपातित्वान्नित्यानि कर्माणि जनितप्रत्यवायत्वात् तस्य तैरेवसक्तस्य अनुष्ठितस्य कर्मणः फलं परिहारार्थं फलहेतुत्वाभावे योगाहिंसाशंकापि प्रत्यवायो न विद्यत इति तमेवं वेदानुवचनेन ब्राह्मणा विविदि
षंति यज्ञेन दानेन तपसाऽनाशकेनेति श्रुत्या संयोगपृथक्त्वन्यायेन ... यज्ञेन दानेन ... नित्यस्य ... वीर्यार्थं नित्यानामपि कर्मणां विविदिषार्थत्वं विनियोगबलात् सिध्यति तत्र
काम्येनैव प्रयोगेण नित्यस्यापि सिद्धेर्न नित्याकरणनिमित्तो वा काम्यत्वात्सर्वांगानुपसंहारनिमित्तो वा प्रत्यवायो विद्यते नित्यानामेव विनियोगान्न नित्येषु च यथा शक्त्युपपत्तेर्वं धर्मस्यानुज्ञानात् एवाति

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ४०॥

केनु काम्यानामप्यत्र विनियोगो दृष्टः यथा वेदानुवचनादीनामेकात्मयज्ञानजन्मनेत्तमेतमिति वाक्येन नित्यानां वस्यते विविदिषः यद्वा विविदिषार्थत्वं काम्यानामपि कर्मणां तमेतमिति वाक्येन संयोग
स्य पृथक्त्वात् इति अस्मिन्पक्षे काम्यानामपि तुल्यफलत्वात् नित्यवद्यथाशक्त्युपपत्तेर्वं धीभविष्यतीति न सर्वांगोपसंहारजनितः प्रत्यवायो विद्यते स्वल्पमपि अस्य योगधर्मस्यानुष्ठितं अनुपमुक्तावी
जकल्पं जन्मजन्मांतराभ्यस्तं दानमध्ययनं तपः तेनैवाभ्यासयोगेन तत्तैव वाम्यसते पुनरितिस्मृतेरूत्तरोत्तर संस्काराधान द्वारा स्वसजातीय हेहेनिमित्तं सत्कामादिदोषक्षपण द्वारा महतो भया
॥त्संसारात्त्रायते तस्मात्संख्यानधिकारिणा कर्मयोग एवानुष्ठेय इति भावः ४०॥

भी० ६५

नन्वेवं सांख्ययोगयोः महाभयात्त्राणहेतुत्वं तुल्यं चेत्को नयो विशेषः तस्मात् शंकया सांख्यानां पातशंका नास्ति योगिनां तु यावद्विदेहकैवल्यं पातशंकास्तीत्याह व्यवसायात्मिकेति व्यवसायस्तन्निश्च
यस्तत्सात्मिका तदाकारा बुद्धिरंतःकरणवृत्तिः अहं ब्रह्मास्मीति वाक्याज्जन्या ब्रह्माकारांतःकरणवृत्तिर्ब्रह्मविद्याभिधाना समस्तद्वैतं तद्बाधेन समसहिता एका एकैव सकृद्विभातो ह्येष ब्रह्मलोक इति श्रुतेः
ब्रह्मैव लोको ब्रह्मलोक इति ब्रह्मैव न हि सकृत्तज्ज्ञातव्यं कर्तव्यं वा किंचिदवशिष्यते कृतकृत्यत्वाद्ब्रह्मविदः नो तस्य पातशंका नास्ति अव्यवसायिनां ज्ञानिनां तु बुद्धयोऽनंताः तासु प्रत्येकं बहुशाखा इति बहुसमेव
ममश्रेय इति निश्चयसद्भावे मत्वा कदाचित् श्रेयसमपि श्रेयो बुद्धेः सत्यां पातशंकास्तीति महांस्तयोर्विशेष इति भावः ४१ उत्तरार्धमेव विवृणोति यामिमामित्यादिना अव्यवसायिनो मूढाः योषु

व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनां ४१
यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः वेदवादरताः पार्थ नान्यदस्तीति वादिनः ४२

ष्पितां पुष्पितद्रुममिव हृद्यतो मेरे रतीयां वाचं अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति अपाम सोमममृता अभूम इत्येवंरूपां प्रवदंति अविपश्चितः अव्यवसायिनो मूढाः यतो वेदवादरताः
वेदांतर्गतेषु अर्थवादेषु यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीत्येवमादिषु रताः हे पार्थ अत एव कर्मणोऽन्यत् आत्मज्ञानं तत्फलं मोक्षश्च नास्तीति वादिनो वदंत
॥श्लोकः ४२॥

राम० ६५

तथा भोगश्चैश्वर्यं च तयोर्गतिः प्राप्तिः तां प्रति तदर्थमित्यर्थः कामात्मानः कामव्यस्तचित्ताः अत एव स्वर्गपराः कीदृशीं भोगैश्वर्यगतिं जन्मकर्मफलप्रदां भोगैश्वर्ययोर्हि प्रवृत्तस्तद्वासनावासितः पुनर्भोगै
श्वर्यप्राप्तये जन्म लभते तत्र तदर्थं कर्माणि च करोति तत्फलं च ततो भोगादिकं प्राप्नोतीति चक्रवन्निरन्तरमावर्तते न निष्ठां न स्थितो भवतीत्यर्थः किं च क्रियाविशेषेण बहुलां यथा यथा वित्तव्ययायासाद्याधिक्यं
तथा तथा भोगैश्वर्यप्राप्तेराधिक्यमित्यर्थः एतेनायासमाध्येष्वपि कर्मसु फललोभात्सज्जंत इत्युक्तं भाष्ये भोगैश्वर्यगतिं प्रति साधनभूताः ये क्रियाविशेषाः अग्निहोत्रादयः तद्बहुलां
जन्मरूपां जन्मरूपं च कर्मफलं तत्प्रदां च वाचमेवेति व्याख्यातं ४३ भोगेति तया पुष्पितया वाचापहृतचेतसां पुंसां बुद्धिः समाधौ समाध्यनुष्ठानकाले व्यवसायात्मिका व्यवसायो

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदां क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ४३

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसां व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ४४

नंतरात्मिका शुद्धचिन्मात्राकारेण विधीयते तेन भवति कर्मकर्तेऽलिकारा विरक्तस्य बुद्धिः समाधौ चिन्मात्राकारा भवति न तु भोगाद्यासक्तस्येति स्पष्टमेव भाष्ये तु समाधौ अंतःकरणे व्यव
सायात्मिका बुद्धिर्न भवतीति व्याख्यातं यद्वा समाध्यनुष्ठानार्थमेव निश्चयात्मिका तेषां बुद्धिर्न भवतीति व्याख्येयं ४४ ॥ ४४ ॥ ४४ ॥ ४४

भी० ६६ कस्यतर्हि समाधौ बुद्धिर्भवतीत्यत आह त्रैगुण्येति त्रैगुण्यं गुणत्रयं गुणात्रयकार्यं कर्म भोगात्मिरूपं संसारं तान्तद्देवप्रकाशयत्वेन विषया येषां ताहशाः कर्मकाण्डपरा वेदाः त्वं तु निस्त्रैगुण्यो
भव ऊर्ध्वगतावपि विरक्तो भवेत्यर्थः वक्ष्यति च तत्त्वनुसारप्रधानं गतिं च यं ऊर्ध्वं गच्छन्ति सत्त्वस्था इति द्वितीयोपि विषयेभ्यो विरक्तः समाधावधिक्रियत इति भावः किंलक्षणो यो निस्त्रैगुण्य इत्यत
आह निर्द्वंद्व इति सुखदुःखे मानापमानौ शत्रुमित्रौ शीतोष्णे इत्यादीनि द्वंद्वानि सप्रतिपक्षपदार्थरूपाणि तेभ्यो निर्गतो निर्द्वंद्वः सर्वत्र समबुद्धिरित्यर्थः ननु बाधमानसुखमादिकं कथं शीतादिवत्सं
तुं शक्यमत आह नित्यसत्त्वस्थ इति नित्यं सर्वदा सत्त्वं धैर्यं सत्त्वगुणो वा तदाश्रितो भूत्वा धीरो हि सर्वं सोढुं शक्तः सात्त्विको वा प्रारब्धकर्मोपस्थापितमिदं दुःखमपरिहार्यं किमुत्तमतयेति जानन्

द्वो१

॥ त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन निर्द्वंद्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ४५

सर्वं सोढुं शक्तोत्येव न नु अत्यन्तलुः सहं स्तु धैर्यादिदुःखं कथं निस्त्रैगुण्येन सर्वथा प्रवृत्तिशून्येन सोढुं शक्यमत आह निर्योगक्षेम इति अप्राप्तस्य प्राप्तिर्योगः प्राप्तसंरक्षणं क्षेमः एतत् द्वयमपि
प्रारब्धकर्माधीनमिति ततोपि निर्गतत्व इत्यर्थः तत्र हेतुरयनः आत्मवान् जितचित्तः सर्वं हि सदा स्वप्राप्य तस्य आनाकुलो नित्यतत्सन्नतया निरुद्यमश्च भवतीति स्वमप्येतादृशो निस्त्रैगुण्यो भवेत्यर्थः राम० ६६

॥४५॥ २१

ननु आत्मतत्त्वं चित्तशुद्धौ सत्यामेव भवति सा च सकलवेदोक्तकर्मानुष्ठानसाध्या अतो निस्त्रैगुण्यपरत्वं दुर्लभमित्याशंक्याह यावानिति सर्वतः संप्लुतोदके महति उदपाने जलाशये पुरुषस्य यावान् अर्थः यावत्
स्नानपानादिकं प्रयोजनं घटमात्रजलं निर्वर्त्यं भवति न त्वल्पजलाशयव्ययनिर्वर्त्यं तावानेवार्थः विजानतो ब्रह्मतत्त्वं न चित्तस्य ब्राह्मणस्य ब्रह्मभूतयोः सर्वेषु वेदेषु वेदैकदेशोपनिषच्छ्रवणमात्रनिर्वर्त्यो भवति न हि
तत्तद्वेदार्थानुष्ठानं स्वसिध्यर्थमपेक्षते एकेन जन्मना हि तत्तद्वेदार्थानुष्ठानासंभवात् एकेन जन्मान्तरीयेण यागादिना चित्तशुद्धौ सत्यामुपनिषच्छ्रवणान्निस्त्रैगुण्यतासंभवतीति भावः द्वयोरस्य संबंधः
संप्लुतोदकस्थानीये आत्मज्ञाने पुरुषस्य तावानर्थः ... सोपि भवति यावान् अनेककूपस्थानीयेषु सकलवेदोक्तकर्मसु अनुष्ठितेषु भवति ब्रह्मवेदसमुन्नं ज्ञानामंतर्भावात् तथा च श्रुतिः ज्ञानेन सर्वे

यावानर्थ उदपाने सर्वतः संप्लुतोदके तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ४६ कर्मण्येवाधि
कारस्ते मा फलेषु कदाचन मा कर्मफलहेतुर्भूर्मा ते संगोस्त्वकर्मणि ४७ ॥ ४७ ॥

कर्मफलानां तत्रैवान्तर्भावं दर्शयति यथा कृताय विजितायाधरेयाः संयन्त्येवमेनं सर्वं तदभिसमेति यत्किंच प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेदेति श्रुतेः सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते
इति गंगातुल्यज्ञानोदयात् प्रागेव कूपोपमानि कर्माणि कर्तव्यानीति भाव इति वाचस्पतिः अस्मिन् पक्षे पूर्वार्द्धे अनेकस्मिन्नुपयथा तथा भवतीति पदद्वयमध्याहारः [illegible]
[illegible] यावान् तावान् पदयोरनुषंगश्च द्रष्टव्यः इति द्रष्टव्यः ४६ ननु ममापि औपनिषदात्मज्ञानार्थिनः शमादिरेवोचितः त्वं कथं मां युध्यस्वेति प्रेरयसीत्याशंक्याह कर्म
ण्येवेति कर्मण्येवाधिकारो न ज्ञाननिष्ठायां मा फलेषु संगोस्त्वित्युपलक्ष्यते कर्मफलं स्वर्गपश्वादि हेतुः कर्मसु प्रवर्तकं यस्य तादृशो मा भूः अकर्मणि कर्माकरणेपि च संगो मास्तु ४७ ॥

भी० ६७ एतदेव विवृणोति योगस्थ इति योगस्थः सन् संगं फलतृष्णां कर्तृत्वाभिमानं च त्यक्त्वा कर्माणि ज्ञानार्थं कुरु हे धनंजय सिध्यसिध्योः कर्मफलस्य विविदिषादेः सिद्धौ असिद्धौ वा समो हर्षविषाद
शून्यो भूत्वा कर्माणि कुर्विति संबंधः इत्थमेवं सिध्यसिध्योः समत्वं योग इत्युच्यते ४८ इममेव बुद्धियोगं स्तौति दूरेणेति कर्मफलकामेन क्रियमाणं बुद्धियोगात् पूर्वोक्तान्निष्कामात्कर्म
णः दूरेणाह्यवरं अवरं अत्यंतं निकृष्टं यतो वस्थौ योगस्तापात्मकत्वफलभूतायां सांख्यरूपायां वा तद्विनिमित्तं शरणं रक्षितारं आश्रयं वा दूष्पूर्वं अन्विच्छ प्रार्थय स्वतत्प्रीत्यर्थं कर्माणि कुर्वित्य
र्थः यतः फलहेतवः फलमेव हेतुः प्रवर्त्तकं येषां ते कृपणाः फलतृष्णावंतः कृपणाः हीनाः भवंति यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपण इति ४९ किंच बुद्धीति बुद्धि
युक्तः समत्वबुद्धियुक्तः योगाय समत्वबुद्धियोगाय युज्यस्व घटस्व योगः सिध्यसिध्योः समत्वबुद्धिः कर्मसु बंधकेष्वपि कौशलं बंधनिवर्त्तकत्वसंपादनं बुद्धियुक्तः कर्मभिः दुष्कृतं त्यजत

योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय सिध्यसिध्योः समो भूत्वा समत्वं योग उच्यते ४८ दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय बुद्धौ शरणमन्विच्छ कृपणाः फल
हेतवः ४९ बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलं ५० ॥ ५० ॥ ॥ ५० ॥ ५० ॥

धर्मेण पापमपनुदतीति श्रुतेः सुकृतं च समजातीयत्वात् दुःपरिहरमिति कथं उभे सुकृतदुष्कृते जहातीत्युच्यते सत्वशुद्धिज्ञानोत्पत्तिद्वारेति प्रांचः अर्वाचस्तु सुकृतत्यागमुक्त
रीत्यासुये फलत्यागात् सुकृतत्यागो पि कर्मयोगिनो भवति दुष्कृतफलवन्मोक्षप्रतिबंधकतत्फलस्याविशेषात् यत्तु आपस्तंबोक्तं आम्रफलनिदर्शनेन नांतरीयकं सुकृतफलं सुकृतं राम०
न तत्फलत्वेनोपपद्यते नांतरीयकत्वादेव तस्मात्फलद्वारा मोक्षप्रतिबंधके क्रियमाणे एव सुकृतदुष्कृते कर्मयोगी जहाति ज्ञानी तु संचिते अपि ते जहातीति तयोर्विशेष इत्याहुः ५० ॥ ६७

गी० १

एतदेवाह कर्मजमिति बुद्धियुक्ताः समत्वबुद्धियुक्ताः क्रियमाणकर्मजं फलं त्यक्त्वा मनीषिणो मनोनिग्रहसमर्था भूत्वा जन्मरूपेण बंधेन मुक्ताः संतो नामयं निरुपद्रवं पदं मोक्षाख्यं गच्छंति ५१ कदा मनीषिणो भवंतीत्यत आह यदेति तेन तव मोहः इष्टानिष्टवियोगसंयोगजपरितापजं वैचित्यं तदेव कलिलं कालुष्यं बुद्धिगतं बुद्धिर्व्यतितरिष्यति व्यतिक्रमिष्यति बुद्धिः प्रसंना भविष्यति तदा श्रोतव्यशास्त्रभागस्य श्रुतस्य च निर्वेदं वैराग्यं गंतासि प्राप्स्यसि अयं भावः मलिनायां बुद्धौ असकृद्गृहीतस्यापि शास्त्रार्थस्यास्फुरणात् श्रोतव्यं श्रुतं च व्यर्थमेव तदा शुद्धायामपि बुद्धौ सद्यः शास्त्रार्थस्फुरणात्तयोर्वै व्यर्थ्यमित्युभयथापि तत्र निर्वेद उचितः प्रसंना च बुद्धिर्निःकामकर्मयोगपा भवतीति श्रवणादिकं त्यक्त्वा ध्याननिष्ठ एव भवेदिति ५२ ननु बुद्धिप्रसादो

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः जन्मबंधविनिर्मुक्ताः पदं गच्छंत्यनामयं ५१ यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ५२ श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला समाधावचला बुद्धि

॥ स्तदा योगमवाप्स्यसि ५३॥

पि केन लिंगेन ज्ञेय इत्यत आह श्रुतीति श्रुतिभिर्नानाविधशास्त्रश्रवणैर्विप्रतिपन्ना आत्मा नित्यो अनित्यो वा नित्योपि कर्ता अकर्ता वा अकर्तापि एको नेको वेत्येवमादिसंशयग्रस्तासती यदा असंभावनाविपरीतभावनानिरासपूर्वकं श्रुतितात्पर्यविषयीभूते ब्रह्मणि हेते निश्चला पुनः कुतर्कैरनास्कंदनीया निर्विचिकित्सा यदा निश्चयवती भूत्वा समाधौ निर्विकल्पके प्रत्यगात्मनि अचला लयविक्षेपशून्या स्थास्यति स्थिरा भविष्यति तदा योगं विवेकप्रज्ञां प्राप्स्यसि निश्चलसमाधिलाभ एव बुद्धिप्रसादलिंगमिति भावः ५३ ॥

स१

गी० लब्धसमाधेःस्थितप्रज्ञापरनाम्नोलक्षणानिबुभुत्सुरर्जुनउवाचस्थितप्रज्ञस्येतिस्थितात्प्रत्यगात्मनि प्रतिष्ठिताप्रज्ञायस्यतस्यस्थितप्रज्ञस्यसमाधिस्थस्यसमाधौस्थितस्यकाभाषाभा
६८ षणंवचनंकथमसौपरैर्भाष्यतेइत्येकःप्रश्नःस्थितधीःस्थितप्रज्ञःअर्थाद्व्युत्थितःसन्किंप्रभाषेतकथंवदतिकथमास्तेकथंवाव्रजतिविषयान्भुंक्तेइतिप्रश्नत्रयं ५४ एतेषांक्रमेणउत्तराणि
हभगवान्प्रजहातीत्यादिना अत्रयान्येवलक्षणानितान्येवज्ञानसाधनानीतिमत्वाउपदिश्यंतेस्थितप्रज्ञलक्षणानितेषांअकृतार्थेप्रयत्नसाध्यत्वात्कृतार्थेस्वाभाविकत्वात् स५
यथोक्तंउत्पन्नात्मप्रबोधस्यत्वद्वेष्टृत्वादयोगुणाःभवंत्ययत्नतस्तस्यनतुसाधकरूपिणइतियःसर्वयोगीसर्वान्स्थूलसूक्ष्म कारणशरीरभोग्यान्कामान्काम्यमानान्विषयान्प्रकर्षेण समू
लंजहातित्यजतिकीदृशान्कामान्मनोगतान्मनस्येवसंकल्प विकल्पात्मकेस्थितान्नतुबहिःयथोक्तमक्षपादाचार्यैःदोषनिमित्तंरूपादयोविषयाःसंकल्पकृताइति।तत्रस्थूलानांकामा

अर्जुनउवाच स्थितप्रज्ञस्यकाभाषासमाधिस्थस्यकेशव स्थितधीःकिंप्रभाषेतकिमासीतव्रजेतकिं ५४ श्रीभगवानुवाच प्रजहातियदाकामा
॥न्सर्वान्पार्थमनोगतान् आत्मन्येवात्मनातुष्टःस्थितप्रज्ञस्तदोच्यते ५५॥

नांत्यागएकांतसेवनमात्राद्भवतीतिसूक्ष्मवीयानेवविलीनकरणानंमस्यसमनस्कस्यजागन्हासनामयःस्वप्नेयेकामाःस्फुरंतितेषामपित्यागोऽसंप्रज्ञातसमाध्यभ्यासवलेनभवतिए
वंत्रिविधान्कामान्मात्यक्त्वाआत्मन्येवात्मखंडैकरसेआत्मनास्वेनैवस्वरूपानंदेनतुष्टःवास्वविषयनिरपेक्षोपरितोषभवतितदायंस्थितप्रज्ञइत्युच्यते ५५ ॥ ५५ ॥ ५५॥ राम०
भगवद्ध्यानादिरूपसद्वासनाभ्यासवलेनभवतियेतूपसंहृतकरणसंप्रज्ञातसमाधिकालेदिव्याःका ६८
मीःसंकल्पमात्रोपनतास्तदुरविद्यासुप्रसिद्धास्तेषामपित्यागी २

सकलेषु

दुःखेषु शास्त्रयात्रादिषु दुःखसाधनेषु प्राप्तेष्वपि अनुद्विग्नमना अचंचलमनाः खस्यतीति च यस्मिन्नुद्विग्नो न दुःखेन युक्तः णापि विचात्युत इति सुखेषु सुखसाधनेषु सर्वचंदनादिषु प्राप्तेष्वपि
विगतस्पृहो निर्हान्तिकत्वाद्भवति अत एव वीतरागभयक्रोधः यस्मात्स तथा न हि तस्य भवस्थायां रागादयो दुःखादयो वा संभवंति एवंविधः समाधिस्थः स्थितधीः स्थितप्रज्ञ उच्यते ५६
स्थितधीः किं प्रभाषेतेत्यस्योत्तरमाह यः सर्वत्रेति सर्वेषु धनदाराजीवनादिषु अनभिस्नेहः अभिस्नेहवान्हि धनदारादिषु विकलेषु वाहमेव विकलः सकलोस्मीति देहमहंभावेन पूर्वापरानु

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ५६ यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभं नाभिनंद
ति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ५७ यदा संहरते चायं कूर्मोंगानीव सर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ५८ ॥ ॥ ॥

संधानरहितो जल्पतीति अयं तु न तथेति भावः तथा शुभं प्राप्य नाभिनंदति संतुष्टो भूत्वा शुभं प्रापयितारं न प्रशंसतीति तथा अशुभं प्राप्य न द्वेष्टि दुःखी भूत्वा अशुभं प्रापयितारं न निंदतीति य
तस्य प्रज्ञा प्रतिष्ठिता ५७ किमासीतेत्यस्योत्तरमाह यदेति इंद्रियार्थेभ्यः शब्दादिविषयेभ्यः प्रारब्धकर्मवशेन व्युत्थितोपि योगी ह्यलदर्शनादुद्विग्नः सन् निरोधसंस्कारप्राबल्या
॥त्पुनस्तत्समाधिमनुतिष्ठन्नेवास्ते इत्यर्थः शेषं स्पष्टं ५८॥

योग:

भी० ननु विषयेभ्य इंद्रियाणां निवृत्तिश्चेत् स्थितप्रज्ञलक्षणं तर्हि सुप्तिमूर्च्छालयगतानां वेशादावपि साम्यमिति सर्वोऽपि स्थितप्रज्ञ एवेत्याशंक्याह विषया इति सत्यं देहिनो देहाभिमानवतो मूढस्य
६६ स्यापि निराहारस्य इंद्रियैर्विषयाननाहरतोऽभुंजानस्य विषयाः विनिवर्त्तंते एव तथापि रसवर्जं रसो भोगाभिलाषो रागस्तद्वर्जं निवर्त्तंते तेनापि सन्न्यासपरिणामो राग मूलस्यात्माज्ञानस्यानाश
नात् सोऽस्थितप्रज्ञ इत्यर्थः अस्य तु पुनः परं दृष्ट्वा आत्मानं साक्षात्कृत्य निराहारस्य पुरुषस्य रसोऽपि निवर्त्तते मूलाज्ञाननाशादिति अस्ति सुप्त्यादौ समाधिस्थस्य च महान्विशेष इ
तिभावः यंवस्तु योगिनः काष्ठतपस्विनो वा मूढस्यापि विषयाननाहरतो रसवर्जं विषया विनिवर्त्तंते तत्त्वस्य परं दृष्ट्वा स्थितस्य रसो निवर्त्तते इति व्याचख्युः ५९ किंच यस्मादिंद्रिया

विषया विनिवर्त्तंते निराहारस्य देहिनः रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्त्तते ५९ यततो ह्यपि कौं ॥
तेय पुरुषस्य विपश्चितः इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः ६० ॥ ६० ॥ ॥

णि अप्रांत्यास्वयमेव लीयंते समाहितेन तु तानि क्रमेणांगानीव स्वेच्छया संहृियंते एतच्चात्यंतायाससाध्यमित्याह यततः इति विपश्चितः शास्त्राचार्योपदेशवतो यततोऽपि समाधि
सिध्यर्थं यतमानस्यापि पुरुषस्य इंद्रियाणि कर्तृणि मनः प्रतीचि स्थिरीक्रियमाणं कर्मीभूतं हरंति विषयप्रवणं कुर्वंतियतः प्रमाथीनि यथा वहवश्चोरा वनेऽएकं पुरुषं प्रमथ्य त
॥ स्य वित्तं हरंति यतः प्रसभमतिशयेन प्रमथनशीलानि ६०॥ राम० ६६

यद्यप्येवं तथापि तानि नियंतव्यान्येवान्यथा स्थितप्रज्ञत्वं सैव वा सिद्धेरित्याह तानीति संयम्य वशीकृत्य युक्तः संनद्धः मत्परः अहमेव सर्वेषां प्रत्यगात्मा परः स्यात् तस्मिन्यो [illegible] हेतु
पारिभ्य आंतरेभ्यश्च उत्कृष्टः प्रियतम यस्य स मत्परः सन्नासीत हि यस्मात् वशे अग्रज्ञायां शेषं स्पष्टं ६१ यदा पंचावतिष्ठंते ज्ञानानि मनसा सह बुद्धिश्च न विचेष्टेत तामाहुः परमां गतिमिति श्रु
तेरिंद्रियमनोबुद्धीनां निग्रहे परमपदप्राप्तिरित्युक्तं तत्र उपसंहृतकरणस्य वा स्यान् शब्दादीन् रस्य तो मनोमात्रेणावस्थितस्य योगिनः मनसा अनिग्रहे किं स्यादित्याह ध्यायत इति द्वा
भ्यां विषयान् शब्दादीन् ध्यायतश्चिंतयतः पुंसः पुरुषस्य तेषु शब्दादिषु संगः संबंधो जायते वा स्वार्थेभ्यो निग्रहीतान्यपि इंद्रियाणि मनो ध्यातान्पुनर्वा त्वां योगभ्रष्टं कुर्वंतीत्यर्थः ततः सं

॥२

तानि सर्वाणि संयम्य युक्त आसीत मत्परः वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ६१ ध्यायतो विषयान्पुंसः संगस्तेषूपजायते संगात्संजायते कामः
कामात्क्रोधोभिजायते ६२ क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ६३ ॥ ॥ ६२॥

गात्कामः तस्मिन्विषये अभिलाषः संजायते कामात् तच्छिद्रहेतोः प्रतिहतात् अग्निज्वलनात् क्रोधोऽभिजायते ६२ ततः क्रोधात् संमोहः कार्याकार्यविवेकाभावो भवति ततः
स्मृतिविभ्रमः शास्त्रार्थानुसंधानस्य विभ्रंशः स्खलनं भवति स्मृतिभ्रंशाद्बुद्धिनाशः शास्त्रार्थस्य निश्चितस्यापि तिरोधानं भवति तस्मिंश्च शास्त्रजन्ये परोक्षज्ञानेऽपि नष्टे पुरुषो नश्य
॥ तीति पुरुषार्थायोग्यो भवति यो हि तादृशः स नष्ट एवेति लोके वदंतीति ६३॥

भी० ७०

ननुविषयान्अध्यायतोपियोगिनोप्युत्थानेप्रमाणस्वाभाव्यादिंद्रियाणांविषयेषुसंगोदुष्परिहारस्ततश्चोक्तरीत्यातस्यार्थिनाशप्राप्तिरित्याशंक्याहरागद्वेषेतिविधेयात्माकिंकरीकृतमनास्तुआत्मवश्यैर्मनोधीनैरिंद्रियैःस्वाभिनश्चित्तस्यकिंकरीकृतस्यकामक्रोधहीनत्वात्स्वयमपिरागद्वेषवियुक्तैःविषयान्पश्यन्पतितृत्वरणादौनिवानास्थयाचरन्प्रश्नपिप्रमान्तत्रकामाघस्त्वनुपात्प्रसादंसंकल्पविकल्पपंकलेपप्रक्षालनेनमनसःस्वास्थ्यंअभिगच्छतिमनसःस्वास्थ्यमेवप्रसमगात्मनःस्वास्थ्यंतस्यततुगणसारत्वात्अजितमनस्कमिवजितमनस्कंविषयसंगोनबाध्यतेऽतोमनोजयोवश्यंकर्तव्यंइत्यर्थः६४

रागद्वेषवियुक्तैस्तुविषयानिंद्रियैश्चरन् आत्मवश्यैर्विधेयात्माप्रसादमधिगच्छति ६४ ॥
प्रसादेसर्वदुःखानांहानिरस्योपजायते प्रसन्नचेतसोह्याशुबुद्धिःपर्यवतिष्ठति ६५ ॥

किंचचित्तस्यप्रसादेहिअस्यपुंसःसर्वदुःखानांकाममूलकानांकामाभावात्हानिःपरिहारोजायतेकामानुदयेहेतुमाहप्रसन्नेतिहियस्मात्प्रसन्नचेतसःपुंसोबुद्धिर्ब्रह्मात्मैकत्वनिष्ठापःआशुशीघ्रंपर्यवतिष्ठतेस्वहृद्भोभवतितस्मिंश्चसतिप्राणाभावान्नकामोदयइत्यर्थः ६५ ॥ राम० ७०

समनस्कानामिंद्रियाणामविजयहेतोः पठन्तः सुदृढं यथैव स्थाने कोदोषइत्यत आह नास्तीति अयुक्तस्य अवशीकृतमनसो नास्त्येव सबुद्धिर्ब्रह्मात्मैक्यनिश्चयो नास्ति प्रमाणविषया संभावना या प्रमेयविषया संभावनायाश्च निरासात्तथा अयुक्तस्य असमाहितमनसः भावना ब्रह्माकारांतःकरणवृत्तिप्रवाहो नास्ति मनसश्चांचल्येन बुद्धेरपि चांचल्यात् अभावयतो ध्यानम कुर्वतः शांतिः सर्वेंद्रियोपरमश्च नास्ति चेतसो नवस्थितत्वेन दुःखावश्यंभावात् अशांतस्य तु यस्तु सर्वदुःखस्य सुखं प्रत्यगात्मानंदात्मकं कुतः न कुतश्चिदपि दुःखावश्यं भावादेव आद्यं अयुक्तस्य कर्म गी॰ ५
तिपरं पुजितयोगेइस्य सूपंहितीयेयुज समाधाविति स्यतस्मादुःखं पर्यवस्थानमावश्यकं ३६ तदभावे दोषमाह इंद्रियाणांहीतिहियस्मात् इंद्रियाणां चरतां स्वस्वविषये प्रवर्तमानानां मेतिमषष्ठी यत् रोगादिकलुषं मनः तान्यनुलक्षीकृत्य विधीयते प्रवर्त्यते कर्मकर्तरि लकारः प्रवर्तते तदस्यार्थः तत् इंद्रियानुसारिमनः अस्य साधकस्य प्रज्ञां आत्मतत्त्वविषयां बहिर्हरति

नास्तिबुद्धिरयुक्तस्यनचायुक्तस्यभावना नचाभावयतःशांतिरशांतस्यकुतःसुखं ६६ इंद्रियाणांहिचरतांयन्मनोनुविधीयते तदस्यहरतिप्रज्ञांवायु
र्नावमिवांभसि ६७ तस्माद्यस्यमहाबाहोनिगृहीतानिसर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता ६८ ॥ ॥ ॥

तस्याः मनोनुसारित्वात् दृष्टांतः स्पष्टार्थः अन्येतु इंद्रियाणां मध्ये यदिंद्रियमनुलक्षीकृत्य मनः प्रवर्तते तदिंद्रियं अस्य साधकस्य मनसो वा प्रज्ञां हरतीति योजयंति आत्मविषयां प्रज्ञां हृ
त्वा मनो विषयविषयां करोतीति भाष्ये लोचनीयं ६७ यततो ह्यपीत्युपक्रांतमर्थं बहुधा उपपाद्य उपसंहरति तस्मादिति यस्मादिंद्रियाधीनं मनो मनोनुगा च प्रज्ञा तस्मात् हे महा
बाहो यस्य यतेः इंद्रियाणि सर्वशः सर्वप्रकारेण स्वकारणेन मनसा सहितानीति यावत् इंद्रियार्थेभ्यः शब्दादिभ्यो निगृहीतानि भवंति तस्य प्रज्ञा प्रतिष्ठितेति विद्धि ६८ ॥

भी० यत्प्राप्यं चावर्तंतेऽतस्तदुदाहृतस्तच्छ्रुतेः ता हुः परमां गतिमित्येवं चतुर्थपादव्याख्येयानिशेति सर्वेषां भूतानामज्ञानां या निशेव निशा यस्यां मध्ये दिने लूकादृवानेधा अर्थं धाम वसर्वे प्राणिनो
७२ भवंति तस्यां तस्मिन्यूत्पगज्योतिषि संयमी इंद्रियमनोबुद्धीनां निग्रहशीलो योगी जागर्ति इंद्रियादीनां हठशक्तिलोपेपि अनुपरतदृक्शक्तिस्वास्ति तथा च श्रुतिः नहि द्रष्टुर्दृष्टेर्विपरिलो
पो विद्यतेऽविनाशित्वादिति यस्यामविद्यारूपायां क्रियाकारकादिद्वैतलक्षणप्रवर्तिकायां सर्वाणि भूतानि जाग्रति निशीथे उलूकादिवस्वस्वव्यापारेषु वर्तंते सा अविद्या पश्यतो मुनेः आत्मद
र्शनवतो योगिनः प्रारब्धकर्मणा विदेहकैवल्यप्रतिबंधात् लेशतोनुवर्तमाना व्युत्थानकाले व्यवहारतोस्ममात्रांधकारी निशेव क्लेशकरी भवति अतिसुकुमारा हि योगिनः वाच्यवहा

या निशा सर्वभूतानां तस्यां जागर्ति संयमी यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ६९

राद्विजंते न रात्रविगाढांधकारासंचारात् तथा चोक्तं योगभाष्ये अक्षिमात्रकल्पो हि विद्वान तल्पदुःखलेशेनाप्युद्विजत इति अत्र वार्तिककारेण निकारकव्यवहारे हि शुद्धवस्तुन वीक्ष्यते शुद्धवस्तुनि षि
द्धे चकारकव्याहृतिस्तथा काकोलूकनिशेवायं संसारोऽज्ञात्मवेदिनो या निशा सर्वभूतानामित्यवोचत्स्वयं हरिरिति शुद्धस्तत्वस्पत्तौ कौ जडोन्मत्तपिशाचवत्तुद्धतत्वोपि लोकस्य जडोन्मत्तपि
शाचवत् स्थितिति देवं किमासीतेत्यस्योत्तरं यदा संहरते चायमित्यादिना एतदंतेन ग्रंथेन स्थितप्रज्ञः स दास माधिमनुतिष्ठं परमां गतिं प्राप्यास्तदुक्तं ६९ ॥ ६९ ॥ राम०
७२